# MP BOARD CLASS 10 SANSKRIT GENERAL MODEL PAPER SET 4 2020

## म.प्र. बोर्ड कक्षा 10 संस्कृत (सामान्य) मोडल पेपर सेट 4 2020

समयः : घण्टात्रयम्] [पूर्णाङ्काः : १००

निर्देशाः-(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नाना सम्मुखे अङ्काः प्रदत्ताः।

प्रश्न १. उचितविकल्पं चित्वा लिखत- १×५=५

(क) 'अत्याचारः' इत्यस्मिन् पदे सन्धिः अस्ति-

(अ) गुणसन्धिः (ब) यणसन्धिः (स) अयादिसन्धिः (द) दीर्घसन्धिः ।

(ख) 'सदाचारः' इत्यस्य पदस्य सन्धि-विच्छेदः अस्ति-

(अ) सत् + आचारः (ब) सदा + आचारः (स) सत्य + आचारः (द) सता + आचारः।

(ग) 'तत् + लीनः' इत्यस्य पदस्य सन्धिः अस्ति-

(अ) तल्लीनः (ब) तद्लीनः (स) ततलीनः (द) तन्लीनः।

(घ) विसर्गसन्धिः अस्ति-

(अ) पयोधरः (ब) नायकः (स) पुस्तकालयः (द) सदाचारः।

(ङ) अधोलिखितेषु अव्ययम् नास्ति-

(अ) प्रातः (ब) तथा (स) अस्तु (द) यथा।

उत्तर-(क) (ब), (ख) (अ), (ग) (अ), (घ) (अ), (ङ) (स)।

प्रश्न २. उचितविकल्पं चित्वा लिखत- १×५=५

(क) 'त्रिभुवनम्' इत्यस्मिन् पदे समासः भवति-

(अ) बहुव्रीहिः (ब) द्विगुः (स) द्वन्द्वः (द) कर्मधारयः।

(ख) 'तत्पुरुषसमासस्य' उदाहरणम् अस्ति-

(अ) पीताम्बरः (ब) पञ्चपात्रम् (स) कृष्णभक्तः (द) पितरौ।

(ग) "वर्ष वर्ष प्रति' इत्यस्य पदस्य समासः अस्ति-

(अ) प्रति प्रति वर्ष (ब) वर्षप्रति (स) प्रतिवर्ष (द) प्रतिवर्षप्रति।

(घ) 'अधिकारः' इत्यस्मिन पदे उपसर्गः अस्ति-

(अ) अध (ब) अधि (स) अधिक (द) अधिका।

(ङ) अधोलिखितेषु उपसर्गः अस्ति-

(अ) कदा (ब) अत्र (स) अनु (द) यदा।

उत्तर-(क) (ब), (ख) (स), (ग) (स), (घ) (ब), (ङ) (स)।

प्रश्न ३. उचितविकल्पं चित्वा लिखत- 1×5=5

(क) 'पास्यति' इत्यस्मिन् पदे लकारः अस्ति-

(अ) लोट्लकारः (ब) ललकारः (स) लट्लकारः (द) विधिलिङ्लकारः।

(ख) 'द्रक्ष्यति' इत्यस्मिन् पदे धातुः अस्ति-

(अ) द्रक्ष (ब) दृश् (स) दा (द) रक्षा

(ग) 'वर्धताम्' इत्यस्मिन् पदे पुरुषः अस्ति-

(अ) प्रथमपुरुषः (ब) मध्यमपुरुषः (स) उत्तमपुरुषः (द) अधमपुरुषः।

(घ) 'याचतु' इत्यस्मिन् पदे वचनम् अस्ति-

(अ) एकवचनम् (ब) द्विवचनम् (स) बहुवचनम् (द) त्रिवचनम्।

(ङ) "विद्या माता इव रक्षति' इत्यस्मिन् वाक्ये अव्ययम् अस्ति-

(अ) विद्या (ब) माता (स) इव (द) रक्षति।

उत्तर-(क) (स),(ख) (ब),(ग) (अ),(घ) (अ),(ङ) (स)।

प्रश्न ४. उचितविकल्पं चित्वा लिखत-

(क) 'ठक्' प्रत्ययस्य उदाहरणम् अस्ति-

(अ) विद्यावान् (ब) पठितः (स) सामाजिकः (द) पठितवान्।

(ख) 'कृ+तुमुन्' इत्यस्य पदम् भविष्यति-

(अ) कृतम् (ब) कतुम् (स) कर्तुम् (द) कतृम्।

(ग) 'याचमानः' इत्यस्मिन् पदे प्रत्ययः अस्ति-

(अ) शानच (ब) तुमुन् (स) क्त्वा (द) शत्।

(घ) 'आदाय' इत्यस्मिन् पदे प्रत्ययः अस्ति-

(अ) क्त्वा (ब) ल्यप् (स) टाप् (द) ज्ञाप।

(ङ) ......... परार्थं कुर्वाणा नावेक्षन्ते प्रतिक्रियाम्-

(अ) दुष्टः (ब) सन्तः (स) दुर्जनः (द) सर्वेः।

उत्तर-(क) (स), (ख) (स), (ग) (अ), (घ) (ब), (ङ) (ब)।

प्रश्न ५. प्रदत्तैः शब्दैः रिक्तस्थानपूर्तिं कुरुत- १×५=५

(पितृसमः, यस्य, चंक्रम्य, मनः, रामदेवस्य)

(क) शाखान्तरं ...........एकः कीटः अवदत् ।

(ख) मया ..........जीवनम् एव अनुसरणीयम्।

(ग) तव अभिगमनेन में............न तृप्तम्।

(घ) ज्येष्ठो भ्राता...............।

(ङ) स्वधियो निश्चयो नास्ति'............स भ्रमति स्वयम्।

उत्तर-(क) चंक्रम्य, (ख) रामदेवस्य, (ग) मनः, (घ) पितृसमः, (ङ) यस्य।

प्रश्न ६. अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत- ३×२=६

(क) वाचा किं न प्रकाशयेत् ?

(ख) जनाः कदा शिष्टाः भवन्ति ?

(ग) विदिशानगरी कस्मिन् प्रदेशे स्थिता विद्यते?

(घ) कः सर्ववस्तुषु हीनः?

(ङ) छत्रसालः कस्य शिष्यः आसीत् ?

प्रश्न ७. अधोलिखितेषु द्वयोः शब्दयोः शब्दरूपाणि त्रिषु वचनेषु लिखत-

(क) साधु-चतुर्थी विभक्तिः।

(ख) नाम-द्वितीया विभक्ति।

(ग) तत् (स्त्री.)-षष्ठी विभक्तिः।

| | | | |
|---|---|---|---|
| उत्तर- (क) | साधवे | साधुभ्याम् | साधुभ्यः। |
| (ख) | नाम | नाम्नी | नामानि। |
| (ग) | तस्याः | तयोः | तासाम्। |

प्रश्न ८. 'मत' अथवा 'राज्ञाम्' इति पदस्य विभक्तिं वचनं च लिखत।

उत्तर- मत्-पंचमी विभक्तिः एकवचनं च।

राज्ञाम्-षष्ठी विभक्तिः बहुवचनं च ।

प्रश्न ९, अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत- ५×२=१०

(अ) कस्मिंश्चिदधिष्ठाने उज्ज्वलकः नाम रथकारः प्रतिवसति स्म। स चातीव दारिद्र्योपहतश्चिन्तितवान्-"अहो ! धिगियं दरिद्रताऽस्मद्गृहे। यतः सर्वोऽपि जनः

स्वकर्मणेव रतस्तिष्ठति । अस्मदीयः पुनर्व्यापारो नात्राधिष्ठानेऽर्हति। यतः सर्वलोकानां चिरन्तनाश्चतुर्भूमिकागृहाः सन्ति। मम च नात्र। तत्कि मदीयेन रथकारत्वेन प्रयोजनम्।"

प्रश्न- (i) क: नाम रथकारः प्रतिवसति स्म ?

(ii) उज्ज्वलका नाम रथकार: कत्र प्रतिवसति स्म ?

(iii) स चातीव केन उपहतश्चिन्तितवान् ?

(iv) सर्वोऽपि जन: कुत्र रतस्तिष्ठति ?

(v) 'रथकार:' इत्यस्य पदस्य समासविग्रहं कृत्वा समासनाम लिखत।

(ब) 'देवराजे जीवति सति अपि कोऽपि तस्मिन् आदरवान् न। रामदेवः तु विंशतिवर्षेभ्यः पूर्वम् एव दिवंगतः चेदपि जनाः प्रतिदिनं तं स्मरन्ति। यः समाजहितं चिन्तयति सः मृतोऽपि जीवति । यः स्वार्थमात्रं चिन्तयति सः तु जीवन्नपि मृतः एव' इति अवगतवान् वासुदेवः 'पया रामदेवस्य जीवनम् एव अनुसरणीयम्' इति सङ्कल्प्य स्वग्रामम् अगच्छत्।

प्रश्न- (i) जनाः कं प्रतिदिनं स्मरन्ति स्म ?

(ii) कः मृतोऽपि जीवति ?

(iii) क: जीवन्नपि मृतः एव भवति ?

(iv) किं सङ्कल्प्य वासुदेवः स्वग्रामम् अगच्छत् ?

(v) 'सङ्कल्पः' इति शब्दस्य विपरीतार्थी पदं लिखत।

(स) पौराणिकी कथानुरूपं हैहयवंशीयाः राजानो अत्र राज्यं प्रकुर्वन्ति स्म। आदिकविना वाल्मीकिना प्रणीतेन रामायणेन विज्ञायते यत् त्रेतायुगे शत्रुघ्नेन स्वकीयं पुत्रं 'सुबाहु' नामानम् अत्रत्यः शासकरूपेणाभिषिच्य प्रदेशमम स्वायत्तीकृतमासीत्। कविकुलगुरुः कालिदासः गीतिकाव्ये मेघदते पूर्वमेघे नगरीमिमां दशार्णदेशस्य राजधानीत्वेन अवर्णयत्।

प्रश्न- (i) हैहयवंशीयाः के अत्र राज्यं प्रकुर्वन्ति स्म ?

(ii) आदिकविः क : आसीत् ?

(ii) आदिकविमा वाल्मीकिना किम प्रणीतम् ?

(iv) कविकुलगुरुः कः?

(v) कालिदासः कुत्र नगरीमिमाम् अवर्णयत् ?

प्रश्न १०. अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत-

५×२=१०

(अ) कृषीबलैः समेधिता भवन्तु धान्यवद्धयः

श्रमेण सन्तु साधितास्तु वीरसाहसद्धयः।

स्मरन्तु पूर्वपुरुषैर्जगत्सु यद् यशोऽर्जितम्

समस्तदिक्षु विश्रुतं तदद्य यावदूर्जितम् ॥

प्रश्न- (i) कैः धान्यवृद्धयः समेधिताः भवन्तु ?

(ii) केन साधिताः तु वीर साहसद्धयः सन्तु ?

(ii) कीदृशः यशः पूर्वपुरुषैः अर्जितम् ?

(iv) किम् अद्य स्मरन्तु ?

(v) 'स्मरन्तु' इति पदस्य विपरीतार्थी पदं लिखत।

(ब) मत्ता गजेन्द्रा मुदिता गवेन्द्रा, वनेषु विक्रान्ततरा मृगेन्द्राः।

रम्या नगेन्द्रा निभृता नरेन्द्राः, प्रक्रीडितो वारिधरैः सुरेन्द्रः॥

प्रश्न- (i) के कुत्रं विक्रान्ततराः ?

(ii) के मुदिताः ?

(iii) सुरेन्द्रः कैः सह प्रक्रीडितः ?

(iv) के रम्याः ?

(v) "वनेषु" इत्यस्य विभक्तिं वचनं च लिखत।

(स) निर्बन्धसञ्जातरुषाऽर्थकार्यमचिन्तयित्वा गुरुणाऽहमुक्तः।

वित्तस्य विद्यापरिसङ्ख्यया मे कोटीश्चतस्त्रो दश चाहरेति ॥

प्रश्न- (i) गुरुणा किं अचिन्तयित्वा उक्तः ?

(ii) गुरुणा कि उक्तः?

(iii) गुरुणा किमर्थ उक्तः?

(iv) गुरुणा कति सङ्ख्यया वित्तस्य कृते उक्तः?

(v) 'गुरुणा' इत्यस्य पदस्य विभक्ति वचनं च लिखत।

प्रश्न ११. युग्ममेलनं कुरुत- १×४=४

| (अ) | (आ) |
|---|---|
| (क) सन्तः | (i) भूषणम् |
| (ख) वाग्भूषणम् | (ii) परार्थ कुर्वाणाः |

(ग) मधुरताम्                (iii) न स्यात्

(घ) दीर्घसूत्री                (iv) इक्षुः

(v) दानी

उत्तर-(क)-(ii), (ख) (i), (ग)→(iv), (घ)→(iii)

प्रश्न १२. शुद्धवाक्यानां समक्षं आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत- १×४=४

(क) यूथाद् भ्रष्टः दासेरक घण्टां वादयन्नागच्छति।

(ख) धनेन अमृतत्वं प्राप्यते।

(ग) संस्कृतस्य व्याकरणं सर्वमान्यं न अस्ति।

(घ) चञ्चलं मनः न अनुभ्रामयेत्।

उत्तर-(क) आम्, (ख) न, (ग) न, (घ) आम्।

प्रश्न १३. अधोलिखितेषु प्रश्नेषु चतुर्णा प्रश्नानाम् उत्तराणि एकपदेन लिखत- १×४=४

(क) विदिशानगरी कस्याः नद्यास्तटे वर्तते?

(ख) प्रकृतिदाः वरः कः?

(ग) कर्मानुसारिणी का? (घ) आश्रमव्यवस्था का पश्यति स्म?

(ङ) भारतस्य पुरातनः सखा कः विद्यते?

उत्तर-(क) वेत्रवत्याः, (ख) वृक्षः, (ग) बुद्धिः, (घ) कात्यायनी, (ङ) हिमालयः।

प्रश्न १४. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत। ४

प्रश्न १५. स्वप्राचार्यस्य कृते त्रिदिवसानाम् अवकाशार्थम् एकं प्रार्थनापत्रं संस्कृते लिखत। ४

अथवा http://www.mpboardonline.com

मित्राय स्वाध्ययनस्य वर्णयन् एकं पत्रं संस्कृते लिखत।

प्रश्न १६. अधोलिखितेषु पञ्च अशुद्धकारकवाक्यानां शुद्धिः करणीया- 5

(क) छात्राः क्रीडाक्षेत्रे क्रीडति।

(ख) नृपः विप्रम् धनं ददाति।

(ग) वृक्षेण पत्राणि पतन्ति।

(घ) श्री गणेशं नमः।

(ङ) मम दुग्धं रोचते।

(च) वयं संस्कृतं पठन्ति।

प्रश्न १७, अधोलिखितवाक्यानां कथानुसारेण क्रम-संयोजनं कुरुत- १×५=५

(१) उष्ट्रः, यूथाद् भ्रष्टोऽभवत्।

(२) सिंहेन उष्ट्रः मारितः।

(३) रथकार : गुर्जरदेशं गत्वोष्ट्री गृहीत्वा स्वगृहमागतः।

(४) तेन प्रचुराः उष्ट्राः करभाश्च सम्मिलिताः।

(५) वने प्रसववेदनया पीड्यमानाम् उष्ट्रीम् अपश्यत्।

(६) रथकारः दारिद्रयोपहतः देशान्निष्क्रान्तः।

उत्तर-(६)→(५), (३)→(४)→(१)→(२)।

प्रश्न १८. अधोलिखितम् अपठित गद्यांश सम्यक् पठित्वा प्रश्नानां उत्तराणि संस्कृतभाषायाम् लिखत- 5

भारतस्य उत्तरायां दिशि महोन्नतः पर्वतराजः हिमालयः वर्तते। यः उत्तरदिशि प्रहरी इव रक्षति। हिमालयः भारतदेशस्य समृद्धः भूभागः अस्ति। अस्मात् पर्वतात् नद्यः निस्सरन्ति देशस्य विशालं भूभागं सिञ्चन्ति च ।

(१) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

(२) भारतस्य उत्तरायां दिशि कः वर्तते ?

(३) प्रहरी इव भारतं कः रक्षति ?।

(४) भारतदेशस्य समृद्धः भूभागः कः अस्ति ?

(५) 'हिमालयः' इति पदस्य सन्धि विच्छेदं कृत्वा सन्धिनाम लिखत।

प्रश्न १९. अधोलिखितेषु एक विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत- १०

(क) अस्माकं देशः, http://www.mpboardonline.com

(ख) उत्सवः,

(ग) संस्कृतभाषायाः महत्त्वम्,

(घ) सदाचारः।